# INDIAN SCHOOL AL WADI AL KABIR

| Class: VIII-3rd Lang. | Department: Sanskrit | Date of submission: N.A |
|---|---|---|
| Worksheet no. 2 | Topic : अपठित – अवबोधनम् | Note: Pl. file in portfolio |

*** निम्नलिखित अनुच्छेदान् पठित्वा प्रश्नान् उत्तरयत |**

1. संसारे अनेका: भाषा: प्रचलिता: सन्ति | तासु संस्कृतभाषा अति प्राचीना अस्ति | विश्वस्य प्राचीनतमं साहित्यं वेदा: उपनिषदा: च अस्यां भाषायाम् एव सन्ति | अस्माकं धार्मिक-ग्रन्था: ,कथा- ग्रन्था: ,नाटक- ग्रन्था: च संस्कृत-भाषायामेव लिखिता: | संस्कृतभाषा तु भारतस्य भाषाणां जननी अस्ति | संस्कृतभाषाया: व्याकरणं तु सर्वत्र प्रसिद्धम् | संस्कृतभाषाया: ज्ञानं विना हिन्दीभाषाया: ज्ञानमपि अपूर्णं भवति | आधुनिकयुगे संगणकस्य (कंप्यूटर) क्षेत्रे अपि संस्कृतस्य प्रयोग: भवति |

(क) एकपदेन उत्तरत |

(i) वेदा: उपनिषदा: च कस्यां भाषायां सन्ति ? ......................

(ii) कस्या: ज्ञानं विना हिन्दीभाषाया: ज्ञानमपि अपूर्णम् ? ......................

(iii) आधुनिकयुगे कस्य क्षेत्रे संस्कृतस्य प्रयोग: भवति ? ......................

(iv) किं संस्कृतभाषा प्राचीना अथवा नवीना ? ......................

(ख) पूर्णवाक्येन उत्तरत |

(i) संस्कृत भाषा केषां जननी अस्ति ? ..........................................................................

(ii) संस्कृतभाषायाम् के ग्रन्था: लिखिता: ? ..........................................................................

**2.** संस्कृतसाहित्ये सुप्रसिद्धेषु कविषु कालिदास: श्रेष्ठ: अस्ति | पाश्चात्य जना: कालिदासं भारतस्य 'शेक्सपीयर' इति कथयन्ति | परं सत्यं तु इदम् अस्ति यद् विश्वसाहित्ये कालिदास: अद्वितीय: अस्ति | तस्य साहित्यं तु सर्वथा अनुपमेयम् |तस्य 'अभिज्ञानशाकुन्तम्' इति नाटकं विश्वसाहित्यस्य सर्वोत्तमं नाटकं अस्ति |

(क) एकपदेन उत्तरत |

(i) क: श्रेष्ठ: कवि: अस्ति ? ......................

(ii) के कालिदासं भारतस्य 'शेक्सपीयर' इति कथयन्ति ? ......................

(ख) पूर्णवाक्येन उत्तरत | (Answer in a complete sentence.)

(i) कालिदासस्य साहित्यं कीदृशम् अस्ति ? ..........................................................................

(ग) निर्देशानुसारेण उत्तरत।

(i) कथयन्ति इत्यत्र किं वचनम् ? ......................

..........................................................................................................................................................